॥ वाल्मीकि रामायण॥

१ बालकाण्ड

अध्याय ३९

देवतानां वचः श्रुत्वा भगवान्वै पितामहः ।
प्रत्युवाच सुसन्त्रस्तान्कृतान्तबलमोहितान् ॥ १॥

यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमतः ।
कापिलं रूपमास्थाय धारयत्यनिशं धराम् ॥ २॥

पृथिव्याश्चापि निर्भेदो दृष्ट एव सनातनः ।
सगरस्य च पुत्राणां विनाशोऽदीर्घजीविनाम् ॥ ३॥

पितामहवचः श्रुत्वा त्रयस्त्रिंशदरिन्दमः ।
देवाः परमसंहृष्टाः पुनर्जग्मुर्यथागतम् ॥ ४॥

सगरस्य च पुत्राणां प्रादुरासीन्महात्मनाम् ।
पृथिव्यां भिद्यमानायां निर्घात सम निःस्वनः ॥ ५॥

ततो भित्त्वा महीं सर्वां कृत्वा चापि प्रदक्षिणम् ।
सहिताः सगराः सर्वे पितरं वाक्यमब्रुवन् ॥ ६॥

परिक्रान्ता मही सर्वा सत्त्ववन्तश्च सूदिताः ।
देवदानवरक्षांसि पिशाचोरगकिंनराः ॥ ७॥

न च पश्यामहेऽश्वं तमश्वहर्तारमेव च ।
किं करिष्याम भद्रं ते बुद्धिरत्र विचार्यताम् ॥ ८॥

तेषां तद्वचनं श्रुत्वा पुत्राणां राजसत्तमः ।
समन्युरब्रवीद्वाक्यं सगरो रघुनन्दन ॥ ९॥

भूयः खनत भद्रं वो निर्भिद्य वसुधातलम् ।
अश्वहर्तारमासाद्य कृतार्थाश् च निवर्तथ ॥ १०॥

पितुर्वचनमास्थाय सगरस्य महात्मनः ।
षष्टिः पुत्रसहस्राणि रसातलमभिद्रवन् ॥ ११॥

खन्यमाने ततस्तस्मिन्ददृशुः पर्वतोपमम् ।
दिशागजं विरूपाक्षं धारयन्तं महीतलम् ॥ १२॥

सपर्वतवनां कृत्स्नां पृथिवीं रघुनन्दन ।
शिरसा धारयामास विरूपाक्षो महागजः ॥ १३॥

यदा पर्वणि काकुत्स्थ विश्रमार्थं महागजः ।
खेदान्वालयते शीर्षं भूमिकम्पस्तधा भवेत् ॥ १४॥

तं ते प्रदक्षिणं कृत्वा दिशापालं महागजम् ।
मानयन्तो हि ते राम जग्मुर्भित्त्वा रसातलम् ॥ १५॥

ततः पूर्वां दिशं भित्त्वा दक्षिणां बिभिदुः पुनः ।
दक्षिणस्यामपि दिशि ददृशुस्ते महागजम् ॥ १६॥

महापद्मं महात्मानं सुमहापर्वतोपमम् ।
शिरसा धारयन्तं ते विस्मयं जग्मुरुत्तमम् ॥ १७॥

ततः प्रदक्षिणं कृत्वा सगरस्य महात्मनः ।
षष्टिः पुत्रसहस्राणि पश्चिमां बिभिदुर्दिशम् ॥ १८॥

पश्चिमायामपि दिशि महान्तमचलोपमम् ।
दिशागजं सौमनसं ददृशुस्ते महाबलाः ॥ १९॥

तं ते प्रदक्षिणं कृत्वा पृष्ट्वा चापि निरामयम् ।
खनन्तः समुपक्रान्ता दिशं सोमवतीं तदा ॥ २०॥

उत्तरस्यां रघुश्रेष्ठ ददृशुर्हिमपाण्डुरम् ।
भद्रं भद्रेण वपुषा धारयन्तं महीमिमाम् ॥ २१॥

समालभ्य ततः सर्वे कृत्वा चैनं प्रदक्षिणम् ।
षष्टिः पुत्रसहस्राणि बिभिदुर्वसुधातलम् ॥ २२॥

ततः प्रागुत्तरां गत्वा सागराः प्रथितां दिशम् ।
रोषादभ्यखनन्सर्वे पृथिवीं सगरात्मजाः ॥ २३॥

ददृशुः कपिलं तत्र वासुदेवं सनातनम् ।
हयं च तस्य देवस्य चरन्तमविदूरतः ॥ २४॥

ते तं यज्ञहनं ज्ञात्वा क्रोधपर्याकुलेक्षणाः ।
अभ्यधावन्त सङ्क्रुद्धास्तिष्ठ तिष्ठेति चाब्रुवन् ॥ २५॥

अस्माकं त्वं हि तुरगं यज्ञियं हृतवानसि ।

दुर्मेधस्त्वं हि सम्प्राप्तान्विद्धि नः सगरात्मजान् ॥ २६ ॥

श्रुत्वा तद्वचनं तेषां कपिलो रघुनन्दन ।
रोषेण महताविष्टो हुङ्कारमकरोत्तदा ॥ २७ ॥

ततस्तेनाप्रमेयेन कपिलेन महात्मना ।
भस्मराशीकृताः सर्वे काकुत्स्थ सगरात्मजाः ॥ २८ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com